**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 2
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# श्रीमद्रामायणे शरणागतितत्त्वम्

Dr. S. Sitarama Rao
Assistant Professor, Department of Paraskara Pourohityam, S. V. Vedic University, Tirupati, India

**Article Info**

**Article History**
Received : 03 April 2024
Published : 16 April 2024

**Publication Issue :**
March-April-2024
Volume 7, Issue 2

**Page Number :** 01-07

**प्रस्तावना-**
भारतीयवाङ्मये इतिहासेषु भारत, भागवत, रामायणानि प्रधानभूमिकां वहन्ति। एते ग्रन्थाः भारतीयसंस्कृतेः स्तम्भाः, भारतीयजीवनस्य रहस्याः, विज्ञानस्य धर्माश्च। अत एव ते भारतीयराष्ट्रस्य मूर्तयः अभवन्। यद्यप्येतेषाम् उत्पत्तिः संस्कृते एवाभवत्तथापि ते राष्ट्रभाषास्वपि प्रभावं कृत्वा शाश्वतजीवनेन पूरयन्ति स्म। त्रयोऽपि ग्रन्थेषु रामायणं प्रथमं काव्यं जातम्।

महर्षिः, आदिकविः, महिमोपेतः वाल्मीकिः संस्कृते आदिकाव्यं रामायणं व्यरचयत्। आदर्शमानवजीवनस्याविष्कारार्थमुद्भूतं काव्यं रामायणमित्यत्र नास्ति संशयः। आदर्शः मानवः कथं भवेदिति रामायणं कथयति। कथं न भवितव्यमिति च निरूप्यते। धर्मः नाम कः इति स्पष्टीकृतः अस्मिन् काव्येI अधर्मः कः इत्यपि च उपदिशति।

न केवलमादर्शमानवस्य जीवनमपि तु आदर्शपरिवारस्य जीवनमपि रामायणे सार्थकतया चित्रितमस्ति। अस्यैव श्रीमद्रामायणमहाकाव्यस्य शरणागतिशास्त्रम् इत्यपरं नाम विद्यते। अतः श्रीमद्रामायणमहाकाव्ये शरणागतितत्त्वमिति विषयमधिकृत्य यथाशक्ति अस्मिन् पत्रे निबध्यते।

**Keywords :** पादुकापट्टाभिषेकसमये भरतः, सुन्दरकाण्डे काकासुरः, युद्धकाण्डे विभीषणः, श्रीरामस्य शरणागतितत्वम् ।

## विषयप्रस्तुतिः-

शरणमिच्छतीति शरणार्थी। कदा एकः शरणागतो भवतीति कोऽपि पृच्छति चेद् वक्तुं शक्नुमः यदा यः कोऽपि स्वस्य बलेन वा सामर्थ्येन वा स्वयं विषमावस्थां तर्तुमशक्नुवन् पूर्णतयान्यस्य कृपां प्रतीक्षां करोति तदानीं सः शरणागत इति। एवं लौकिकावस्थायां यः कोऽपि यदाकदापि शरणार्थी भवितुम् अर्हति। युद्धसमयेऽपि जनाः विविधैः कष्टैः शरणार्थिनः जायन्ते। तथैव आध्यात्मिकविषये शरणागताः भवन्ति जनाः। बुधाः जननमरणचक्रात् मोचनार्थं भगवन्तमेवाश्रयं गच्छन्ति। तादृशेषु शरणार्थिष्वन्यतमः श्रीमद्रामायणे प्रधानभूतः भवति विभीषणः।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

विभीषणः रावणस्य द्वितीयः सहोदरः। शत्रूणां कृते भयङ्कर इत्येव विभीषणनाम्नः अर्थः। सप्तचिरञ्जीविषु द्वावपि रामायणसम्बन्धौ स्तः। आञ्जनेयः तथा विभीषणश्च। यद्यपि विभीषणः राक्षसकुले सञ्जातः तथापि विष्णुभक्तः नीतिमान् च। विभीषणः तपसा ब्रह्माणं प्रत्यक्षीकृत्य विष्णुभक्तिमेव वररूपेण प्राप्तवान्। तस्य नीतिबोधनं रामायणे बहुत्र द्रष्टुं शक्नुमः। विभीषणोपदेशः रामायणे सुप्रसिद्धः। सीतापहरणानन्तरं रावणकृत कार्यं नोचितमिति, सीतां प्रत्यर्प्य रामं शरणं गच्छतु इति च प्रोवाच विभीषणः।

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः।
आज्ञापयद्वधं तस्य रावणः क्रोधमूर्छितः ॥ वा.रा. 5.52.1

इति लङ्कायाः दहनान्तरं गृहीतस्य हनुमतः वधार्थं यदा रावणेन आज्ञा प्रदत्ता, तदा दूतस्य हननं राजनीतेरुल्लङ्घनं भवतीति रावणं प्रत्युपदिष्टवान्विभीषणः।

रामायणे विभीषणस्य तत्त्वोपदेशः प्रसिद्धः। दौत्यं कर्तुमागतस्य हनूमतः वचनं श्रुत्वा रावणस्य सर्वाङ्गाणि क्रोधेन ज्वलन्ति स्म। तत्क्षणं हि सः स्वीयान्सेवकानाहूयावदत् 'हे वीराः! यूयमेतं वानरं हत्वा यमलोकं प्रेषयत इति। तदा रावणस्यादेशं श्रुत्वा तत्रोपस्थितः विभीषणः रावणं प्रति - "हे राक्षसराज! भवान्धर्मस्य ज्ञाता, राजधर्मस्य च विशेषज्ञः अस्ति। दूतस्य वधः क्रियेत चेद् भवादृशस्य पण्डितस्य अपवादः भवेत्।

वधे तस्य समाज्ञप्ते रावणेन दुरात्मना।
निवेदितवतो दौत्यं नानुमेने विभीषणः॥ वा.रा.5.52.2
राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितम्।
तव चासदृशं वीर कपेरस्य प्रमापणम्॥ वा.रा.5.52.6
तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद।
युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम्॥ वा.रा.5.52.9
प्रसीद लङ्केश्वर राक्षसेन्द्र धर्मार्थयुक्तं वचनं शृणुष्व।
दूतानवध्यान् समयेषु राजन् सर्वेषु सर्वत्र वदन्ति सन्तः॥ वा.रा.5.52.13

हे लङ्काधिपते! एषः वानरः यदा आत्मानं दूतं वदति तदा नीतेः धर्मानुसारं तस्य वधः अनुचितः भवेत्, यतः दूतः सर्वदा अन्यैः प्रदत्तं सन्देशं हि श्रावयति। सः यत्किमपि वदति तत्सर्वं स्वीयं न भवति। अतः दूतोऽवध्यः भवतीति रावणस्य प्रतिपादनं दूतवधं विभीषणः निवारयामास। अतः उचितमनुचितं च सम्यग्विचार्य तस्मै दूताय कस्यचिदन्यदण्डस्य विधानं करोतु' इत्यब्रवीत्।

विभीषणस्य वचनं श्रुत्वा रावणोऽपि –

न पापानां वधे पापं विद्यते शत्रुसूदन।
तस्मादेनं वधिष्यामि वानरं पापचारिणम्॥ वा.रा.5.52.11

"हे शत्रुसूदन! पापिनां वधः क्रियते चेत्पापं न भवति। एषः वानरः वाटिकायाः विध्वंसं कृत्वा राक्षसानां च वधं कृत्वा महत्पापमकरोत्। अतोऽहमवश्यमेतस्य वधं करिष्यामि" इति प्रत्युत्तरमदात्।

तदा पुनः विभीषणः -

साधुर्वा यदि वाऽसाधुः परैरेष समर्पितः।
ब्रुवन् परार्थं परवान्न दूतो वधमर्हति॥ वा.रा.5.52.20

इति रावणं बहुधा प्रार्थयामास।

तदा विभीषणस्य नीतिपूर्णं वचनं श्रुत्वा रावणः किञ्चिद्विचार्य -"हे विभीषण!

सम्यगुक्तं हि भवता दूतवध्या विगर्हिता।
अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः॥ वा.रा.5.53.2

तव कथनं सत्यमस्ति, परन्तु एषः अशोकवाटिकायाः नाशमकरोत्। तदर्थमेषः दण्ड्यः। वानराणां लाङ्गूलमत्यन्तं प्रियकरं भवति। अतोऽहं युष्मानाज्ञापयामि यत्तस्य लाङ्गूले वस्त्रं बद्ध्वा तस्मिन्तैलं योजयित्वा तस्य लाङ्गूलमग्निना ज्वलयित्वा भस्मसात्कुरुत, येन लाङ्गुलं विना तं दृष्ट्वा सर्वे हसेयुः, सः च आजीवनं तस्य कर्मणि पश्चात्तापं कुर्यात्" इत्यवदत्। अत्र विभीषणस्य राजनीतिः बहुधा प्रशंसनीयो भवति।

एवमेव रामरावणयोः युद्धं निवारयितुं बहुविधप्रयत्नं कृत्वापि ज्येष्ठस्य रावणस्य शाठ्यकारणतः युद्धनिवारणं कर्तुं न शक्तवान्विभीषणः। भगवान् राम अजय्योऽस्तीति विष्णुभक्तः सः सम्यक् जानाति स्म। एवं रामावतारलक्ष्यञ्च। अस्मिन्नवसरे भ्रातुः जीवरक्षणार्थं तेन बहुधा प्रयत्नः कृतः –

प्रसादयेत्वां बन्धुत्वात्कुरुष्यवचनं मम ।
हितं तथ्यमहं ब्रूमि दीयतामस्य मैथिली॥ वा.रा.6.9.20

इति। तथाप्यतीव कामसम्पन्नः वैदेहीमनुचिन्तयन् रावणः युद्धं कर्तव्यमिति विचिन्त्य मन्त्रिभिः सुहृद्भिश्च सह मन्त्रणं कर्तुं सभागृहं प्रति प्रस्थानमकरोत्। युद्धसमये नीतिमान्वेदज्ञः तेजस्वी विभीषणः अग्रजस्य रावणस्य गृहमाविशत्। ततः परं पूज्यमानः सः विभीषणः आसनस्थं रावणमवन्दत। राजा रावणः तस्मै सदाचारसम्मतमाशीर्वाद्यासन्दे उपवेष्टुमनुमतिमदात्। विभीषणः तदा राजनिर्दिष्टे काञ्चनभूषिते आसन्दे उपविश्य मन्त्रिगणस्य पुरतः भ्रातरं रावणं युक्तिपूर्णं हितकरं वाक्यं वक्तुमारभत –

यदा प्रभृति वैदेही सम्प्राप्तेमां पुरीं तव ।
तदा प्रभृति दृश्यन्ते निमित्तान्यशुभानि नः॥ वा.रा.6.10.14

"हे परन्तप! यदा प्रभृति वैदेही इह सम्प्राप्ता तदा प्रभृति लङ्कायामशुभानि दृश्यन्ते। अग्निशालासु सरीसृपाः हव्येषु च पिपीलिकाः दृश्यन्ते। एतानि सर्वाणि अशुभलक्षणानि सन्ति। अतः हे वीर! -

प्रापणे चास्य मन्त्रस्य निवृत्तास्सर्वमन्त्रिणः ।
अवश्यं च मया वाच्यं यद्दृष्टमपि वा श्रुतम्॥ वा.रा.6.10.25

यद्यपि भवतः भीतः भूत्वा कश्चिदपि मन्त्री भवतः समक्षमित्थं हितवचनं नावदत्तथाप्यहं यत्पश्यामि यच्छृणोमि तदेव वदामि। अतः भवान्सम्यक् विवेचनं कृत्वा यथा न्याय्यं तत्कर्तुमर्हति। सीतायाः यदपहरणं भवता कृतं तत्सर्वथा अनुचितम्।

वृतो हि बाह्वन्तरभोगराशिश्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः।
पञ्चाङ्गुलीपञ्चशिरोऽतिकायः सीतामहाहिस्तव केन राजन्॥ वा.रा.6.14.2

प्रकृतरूपेण सीता काचित्सर्पिणी वर्तते या भवतः प्राणान् हर्तुमुद्यता भूत्वा भवतः कण्ठे विराजते। तस्याः उन्नतः उरोजः भयङ्करी फणा वर्तते। तस्याः चिन्तनं मारकविषं वर्तते। तस्याः पञ्चाङ्गुली पञ्चशिरः वर्तते। किमर्थं भवानेतां सीतारूपिणीं अतिकायसर्पिणीमानयत्? भवान् कामेन वशीभूतः सन् सर्वथा अनुचितं कार्यं करोति, भवतः मन्त्रिणः चापि केवलं भवतः चाटुकारितां कुर्वन्तः भवतः इच्छानुसारं वदन्ति। ते भवतः हिताय वार्तां न कुर्वन्ति। अहं पुनः वदामि यत् श्रीरामाय सीतां प्रदाय तेन सह सन्धिः क्रियेत चेदेव भवतः, लङ्कायाः, समस्तराक्षसजातेः च कल्याणं भविष्यति।

यावन्न लङ्कां समभिद्रवन्ति वलीमुखाः पर्वतकूटमात्राः।
दंष्ट्रायुधाश्चैव नखायुधाश्च प्रदीयतां दाशरथाय मैथिली॥ वा.रा.6.14.4

यावत्पर्वतकूटमात्राः दंष्ट्रायुधाः नखायुधाश्च वानराः लङ्कां न समभिद्रवन्ति तावन्मैथिली श्रीरामाय प्रदीयतामित्येव अस्माकं कृते लङ्कायाः कृते च मङ्गलं भवेत्। रामः कश्चन साधारणमानवः नास्ति। नौकां विना समुद्रतरणं यथा असम्भवकार्यं तथा तस्य वधोऽपि न सम्भवेत्। अहं तस्य शक्तिं सम्यग्जानामि। अस्माकं सम्पूर्णदानवीयशक्तिरपि तं सम्मुखीकर्तुं न शक्ष्यति। राक्षसमात्रेण किम्? देवः, गन्धर्व, किन्नर इत्येतेऽपि रामं पराजेतुं न शक्ष्यन्ति।

श्रीरामस्य सेनायां हनुमत्सदृशाः लक्षशः वानराः सन्ति, ये श्रीरामस्य कृते स्वीयान्प्राणान्त्यक्तुं शक्नुयुः। अतः हे राक्षसराज! ममेयं सम्मतिः यद्भवान्जानकीं श्रीरामाय प्रत्यर्प्य लङ्कापुरीं महतः सङ्कटाद्रक्षतु। यदि भवानेवं न कुर्यात्तर्हि मम भयमस्ति यल्लङ्कायाः सर्वनाशः भवेत्। रामलक्ष्मणयोः तीक्ष्ण बाणेभ्यः लङ्कानागरिकेषु कश्चिदपि जीवितः न भवेत्। हे राजन्! यः मनोरथः साम, दान, भेद इत्यादिभिः पूर्णः न भवति, तस्य प्राप्तये नीतिशास्त्रस्य आश्रयः स्वीकरणीयः भवेत्। हे राजन्! अनवहितः, व्याधिग्रस्तः, कार्यान्तरासक्तः इत्यादिषु बलप्रयोगं कृत्वा कार्यं साध्येत, परन्तु अप्रमत्तं जितरोषं दुराधर्षं रामं कथं भवान्धर्षयितुं शक्नुयात्? सः तु दृढनिश्चयं कृत्वा भवता सह युद्धं कर्तुम् आगच्छति। अतः तेन सह युद्धं कृत्वा विजयप्रापणं सरलकार्यं नास्ति। किं वयं जानीमः स्म यत्कश्चन लघुः वानरः हनुमान् एतावन्तं विशालं समुद्रमुल्लङ्घ्य लङ्कापुरीमागन्तुं शक्नुयात्? परन्तु सः केवलं न आगच्छत्, अपि तु लङ्कां ध्वंसीकृत्यागच्छत्। तेषामपरिमेयानि बलानि वीर्याणि च सन्ति। कथञ्चनापि परेषां सहजावज्ञा न कर्तव्या। पुरा यशस्विना श्रीरामेण राक्षसराजस्य किञ्च अपकृतं यस्मात् जनस्थानात्तस्य भार्यामपहृत्यानयत्? यदि भवन्तः वदन्ति यत् खरः रामेण हतः तर्हि आदौ खरः एव रामस्योपरि आक्रमणमकरोत्। प्राणिना अवश्यं स्वीयाः प्राणाः यथाबलं रक्षितव्याः भवन्ति, अतः सः तथैव अकरोत्। एतन्निमित्तं हि भवान् वैदेहीमपहृत्यानयत्। अतः सा शीघ्रं परित्याज्या। श्रीरामाय वैदेही प्रदीयतामित्येव प्रकृतं प्रायश्चित्तं मन्येऽहम्। हे राजन्! यद्यहमिदं वाक्यं मोहाल्लोभाद्वा वदामि तथापि भवान्दोषं कर्तुं नार्हति। सीताहरणकारणादयं सर्वेषां राक्षसानां, राक्षसीनां, पुरस्य, अन्तःपुरस्य च दोषः उपलक्षते” इत्युपदेदेश।

तदा रावणः विभीषणं प्रति –

अन्यस्त्वेवं विधं ब्रूयाद्वाक्यमेतन्निशाचरः।
अस्मिन् मुहूर्ते न भवेत्त्वां तु धिक्कुलपांसन॥ वा.रा.6.16.16

"विभीषण! त्वम् अस्माकं घोरशत्रुः असि यत् त्वं वारंवारं रामस्य प्रशंसां कुर्वन् अस्मान् दुर्बलान्कारयितुं प्रयतसे। अहं जानामि यत्त्वं तव मुखेन मम हितं वदसि किन्तु तव हृदयेन ममैश्वर्यम्, वैभवम्, लोकप्रियता इत्यादिभ्यः ईर्ष्यसि। यदि त्वं मम भ्राता न अभविष्यः तर्हि सर्वप्रथमम् अहं तव वधम् अकरिष्यम्।

इत्युक्तः परुषं वाक्यं न्यायवादीविभीषणः ।
उत्पपातगदापाणिश्चतुर्भिस्सहराक्षसैः ॥ वा.रा.6.16.17

मम पुरतः दूरे अपसर देशद्रोहिन्! पुनः कदापि आगत्य तव मुखं मा दर्शयिष्ठाः" इति देशबहिष्कारमकरोत्। तदा विभीषणः –

सुलभाःपुरुषराजन् सततंप्रियवादिनः ।
अप्रियस्यचपथ्यस्यवक्ताश्रोताचदुर्लभः॥ वा.रा.6.16.21

हे राजन्! लोके प्रियवादिनः जनाः सुलभाः भवन्ति। परन्तु अप्रियस्य हितस्य वक्ता, श्रोता च दुर्लभः एव। हे राजन्! वैरं निरर्थकमिति विभीषणः रामेण रावणस्य युद्धं निवारयामास। तथापि विभीषणस्य वचनानि विनाशकाले रावणस्य कृते अस्वीकार्याणि एवासन्। तदा रावणानुजः विभीषणः मुहूर्तेन तत्र अगच्छद्यत्र सलक्ष्मणः रामः आसीत्।

तदा तत्र तदा पवनपुत्रः हनुमान् सुग्रीवं प्रति - "हे राजन्! रावणस्य भ्राता विभीषणः महात्मा अस्ति। लङ्कायां तादृशः नीतिमानन्यः कश्चिदपि नास्ति। लङ्कायां सः एव जानक्याः अपहरणस्य विरोधं करोति स्म। मम मतानुसारं तु सः ग्राह्यः भवेत्" इत्यवोचत्।

श्रीरामः सुग्रीवं प्रति - "अस्माभिः रावणः म्रियेत तर्हि विभीषणः लङ्कायाः राजा भवितुमर्हेत्। अतः हे सुग्रीव! यदि सः अस्मच्छरणमागन्तुमिच्छति तर्हि अस्माभिः तस्मै शरणं दातव्यम्। अत्यन्तं दुःखितः भूत्वा यदि कश्चन शत्रुः अपि शरणमागच्छति तर्हि तस्मै शरणं दातव्यम्। अन्यथा एवं शरणागतस्य रक्षणं न क्रियते चेत् महत्पापं भवति। अतः शरणमागच्छते विभीषणायाभयदानं हि उचितं भवेत्। अतः हे मित्र! भवान् तं मम समीपमानयतु" इति।

राजा सुग्रीवः विभीषणमानीय यदा श्रीरामस्य समीपमागच्छत् तदा सः श्रीरामस्य पुरतः हस्तौ योजयित्वा "हे धर्मात्मन्!

रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः।
तस्याहमनुजो भ्राता विभीषण इति श्रुतः॥ वा.रा .6.17.12

अहं लङ्काधिपतेः रावणस्य कनिष्ठः भ्राता विभीषणोऽस्मि। एतद्ज्ञात्वाहं भवतः समीपमागच्छं यद्भवान् शरणागतवत्सलः अस्ति। भवान् मादृशस्य शरणागतस्य उद्धारं करोतु। लङ्कापुरी, मित्रम्, धनम् इत्यादिकं सर्वं त्यक्त्वा भवन्तं सर्वभूतानां शरण्यं शरणागतः अस्मि" इत्यवदत्।

अनन्तरं विभीषणस्य मुखात् लङ्कायाः वीराणां शौर्यगाथां श्रुत्वा रामचन्द्रः –

अहत्वा रावणं संख्ये सपुत्रजनबान्धवम्।
अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे॥ वा.रा.6.19.21

"हे विभीषण! तान्सर्वानहं जानामि। लङ्कायां महान्तः शूरवीराः सन्ति चेदपि अहं तव पुरतः प्रतिज्ञां करोमि यत्तैस्सर्वैः वीरैस्सह रावणं हत्वा त्वां लङ्कायाः राजानं कारयिष्यामि। यद्यपि रावणः रसातलं वा प्रविशेत्पातालं वापि, पितामहसकाशं वा गच्छेत्तथापि सः मम हस्ताज्जीवितुं न शक्ष्यति। अहं त्रिभिर्भ्रातृभिश्शपे यत्सङ्ख्ये सपुत्रबान्धवं रावणमहत्वा अयोध्यां न प्रवेक्ष्यामि" इति प्रतिज्ञामकरोत्।

श्रीरामचन्द्रस्य प्रतिज्ञावचनं श्रुत्वा विभीषणः तस्य चरणस्पर्शं कृत्वा –

श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः।
शिरसाऽऽवन्द्य धर्मात्मा वक्तुमेवं प्रचक्रमे॥

राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणे।
करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम्॥ वा.रा.6.19.22, 23

"हे राघव! अहमपि भवतः चरणयोः शपथग्रहणं कृत्वा प्रतिज्ञां करोमि यदहं रावणेन सह तस्य सर्वान्योद्धॄन् हन्तुं भवतः पूर्णं साहाय्यं करिष्यामि" इति प्रतिज्ञामकरोत्।

विभीषणस्य प्रतिज्ञया सन्तुष्टः राघवः –

इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम्।
अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय॥
तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम्।
राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद॥ वा.रा.6.19.24, 25

लक्ष्मणेन समुद्राज्लमानाय्य विभीषणस्याभिषेकं कृत्वा सम्पूर्णवानरसेनायाः पुरतः घोषणामकरोद्यदद्य प्रभृति महात्मा विभीषणः लङ्कायाः राजा अभूत्।

अन्ते रावणस्य हस्ताद्मरणं नेच्छन्नखिललोकपालकस्य श्रीरामस्य पक्षे स्थितवान्। भगवान् रामः विभीषणस्य सत्त्वबुद्धिं सत्यनिष्ठां च सर्वथा अभिनन्दितवान् स्वबन्धुरिव तं स्वीकृतवान् च।

युद्धानन्तरं रामः एव लक्ष्मणद्वारा विभीषणं लङ्कायाः राज्यसिंहासने नियुक्तवान्। एवमनन्य भक्त्या कर्मनिष्ठया च सः चिरञ्जीवी पदं प्राप्नोत्।

श्रीमद्रामायणमहाकाव्ये शरणागतरक्षकः श्रीराम इति सूचयन् अन्यद् वृत्तान्तमस्ति। सीता हनूमन्तं प्रति एतद्वृत्तान्तं वदति। पूर्वं चित्रकूटपर्वतस्य समीपस्थवने यदा आवामुषितवन्तः तदा इयं घटना संवृत्ता। तद्वनं देवलोकवनादपि सुन्दरतरम्। तत्रैकदा यदा श्रीरामः मम उत्सङ्गे शिरः निधाय शेते स्म तदा धाराधरः नामकः काकासुरः अतितीक्ष्णैः अग्रनखैः मदीयं स्तनतटं विदारितवान्। तथा मां क्षतग्रस्तां कारयन्तं तं काकासुरं रघुपतिः अपश्यत्।"

तस्य पत्नीं सीतां पीडयन्तं धृष्टं काकरूपधरमि इन्द्रसुतं जयन्तमवलोक्य अतुलपराक्रमः श्रीरामः –

स दर्भं संस्तराद्गृह्य ब्रह्मास्त्रेण ह्ययोजयः।
स दीप्त इव कालाग्निर्जज्वालाभिमुखः खगम् ॥
क्षिप्तवांस्त्वं प्रदीप्तं हि दर्भं तं वायसं प्रति।
ततस्तु वायसं दीप्तस्स दर्भोऽनुजगाम ह ॥ वा.रा.5.67.12,13

कुशमेव अभिमन्त्र्य ब्रह्मास्त्रत्वेन प्रयुक्तवान्। तच्च कुशास्त्रं तं काकासुरं दिशि दिशि प्रधावयति स्म। अन्ततः सर्वतः परित्यक्तः सः काकः राममेव शरणं गतः। शरणागतवत्सलः श्रीरामः वधार्हस्यापि तस्य प्राणरक्षणं कृत्वा तस्य एकमेव नेत्रमहरत्। अनेन सः काकासुरः इन्द्रपुत्रः 'चिरजीवी', 'एकदृष्टिः' इति काकसञ्ज्ञाम् अन्वर्थाम् अकरोत्।

**निष्कर्षः-**

एवं परिशील्यमाने श्रीमद्रामायणमहाकाव्ये पादुकापट्टाभिषेकसमये भरतः, सुन्दरकाण्डे काकासुरः (धाराधरः), युद्धकाण्डे विभीषणः श्रीरामं शरणं गत्वा सफलतां ययतुः। अत एव श्रीमद्रामायणमहाकाव्यं शरणागतिशास्त्रमित्युक्तिः समुचितं भवति।

उपयुक्तग्रन्थसूची-

1.) Shrimad Valmiki Ramayanam, Geeta Press, Gorakhpur 2016
2.) Sampurna Valmiki Ramayanam ( telugu), Gollapudi viraswamy sons, Rajahmundry 1996.
3.) Sundarakanda (Sanskrit) Gorakhpur, Geeta Press, 2000
4.) Valmiki Ramayanam (Sanskrit), Rashtriya Sanskrit Vidyapeeth Tirupati, 2010
5.) Sampoorna Ramayanam (Kannada), Vidya publishing house, Bangalore, 2016
6.) Shrimad Ramayanam (telugu), Jayalakshmi publications, Hyderabad .2006
7.) Shrimad Ramayanam (volume no 5),Tirumala Tirupati Devasthanams, Tirupati, 2012